| | | |
|---|---|---|
| (1) A vowel (2) A musical note. | अकारादिषु[1] वर्णेषु [a]षड्जादिषु[2] च सप्तसु । | |
| (3) Accent (4) Articulate sound. | [3]उदात्तादिषु विज्ञेयः [4]प्राणिनां च स्वने **स्वरः** ॥८६३॥ | |
| (1) The equipoise of the 3 qualities of nature viz. * | सत्त्वादीनां [1]साम्यावस्थां **प्रकृतिं** वदन्ति तत्त्वज्ञाः । | * (i) Goodness (ii) foulness and (iii) darkness. |
| (2) A citizen. (3) A minister. (4) A cause. | [2]पौर[3]ामात्यादीनि च [4]कारण[5]कारु[6]स्वरूपाणि ॥८६४॥ | (5) A mechanic (6) The natural form. |
| (1) The 3 qualities of nature (2) Shape. | [1]सत्त्वादौ [2]रूपादौ [3]शौर्यादौ [4][b]तन्तुषु प्रयोगज्ञाः । | (3) Heroism. (4) Cord or string. |
| (5) A bowstring. | **गुणशब्दं** [5]सिञ्जिन्यां प्रयोजयन्त्य[6]प्रधानेऽपि ॥८६५॥ | (6) A subordinate quality or inferior degree. |
| (1) A tool (2) An agent (3) Wealth. | [1]उपकरणे [2]करणे च [3]द्रविणे [4]लिङ्गे च [5]यातनायां च । | (4) Penis. (5) Torture. |
| (6) A component part of an army. | [6]सेनाङ्गे [7]संसिद्धौ **साधन**शब्दप्रयोगः स्यात् ॥८६६॥ | (7) Accomplishment. |
| (1) Meaning. (2) Purpose. (3) Motive. | [1]अभिधेया[2]भिप्राय[3][c]प्रयोजन[4]द्रव्यवाचकेष्वर्थः । | (4) Wealth. |
| (1) Opportunity. (2) Multitude. | [1]प्रस्तावे [2]संघाते [3]कुत्साया[4]मायुधे [5]जले **काण्डम्** ॥८६७॥ | (3) Censure (4) An arrow (5) Water. |
| (1) The holy scripture, the Vedas (2) The supreme spirit. | [1]वेदा[2]ध्यात्म[3]ब्राह्मण[4]हिरण्यगर्भेषु कथ्यते **ब्रह्म** । | (3) A Brahman. (4) The creator of the universe. |
| (1) The 3 qualities of nature (2) Existence (3) Power. | [1]प्रकृतिगुणे [2]सत्तायां [d][3]स्थामनि [4]भूते च **सत्त्वं** स्यात् ॥८६८॥ | (4) Living being. |
| (1) The earth. (2) Speech (3) Food. | **इराशब्दो** बुधैर्ज्ञेयो [1]भुवि [2]वाच्य[3]शने[4]ऽम्भसि । | (4) Water. |
| (1) Time (2) Pluto. | [1]निमेषादौ [2]यमे [3]वर्णे **कालो** [4]मृत्यौ च कीर्त्यते ॥ | (3) Black. (4) Death. |
| (1) Time. (2) Convention. | [1]काल[2]सङ्केत[e][3]काचार[4]सिद्धान्ताः **समयाः** [f]समाः ॥८६९॥ | (3) Practice. (4) Dogma. |
| (1) A thread. (2) Mystic prayer. | [g]**तन्त्रं** [1]तन्तुषु [2]मन्त्रेषु [3]सिद्धान्त[4]परिच्छद[5]प्रधानेषु । | (3) Established doctrine. (4) Retinue. (5) Chief. |
| (1) Effort (2) informing against. | [1]उत्साह[2]नसूचनयोः [3]प्रकाशने **गन्धनं** प्रोक्तम् ॥८७०॥ | (3) Manifestation. |
| (1) Clothing (2) The middle (3) A hole. | [1]वस्त्रे [2]मध्ये तथा [3]छिद्रे [4]व्यवधाने[5]ऽन्तरात्मनि । | (4) Intervention. (5) The soul. |
| (6) Opportunity. (7) Connexion with the exterior. | [6]अवकाशे [7]बहिर्योगे [8]विशेषे[9]ऽवसरे**ऽन्तरम्** ॥८७१॥ | (8) Difference. (9) Occasion. |

a खड्गादिषु b तन्तुषु च c प्रयोजद्रव्य प्रयोजनकचकचकरचर्थिः
d स्थाम्नि e चारे, सिद्धान्तसमयाः f स्मृताः g तन्त्रेषु ।